# Shri Skanda Vedapada Stotram

# શ્રીસ્કન્દવેદપાદસ્તોત્રમ્

## Document Information

Text title : Skanda Veda Pada Stotram

File name : skandavedapAdastotram.itx

Category : subrahmanya

Location : doc_subrahmanya

Proofread by : Preeti N Bhandare

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# શ્રીસ્કન્દવેદપાદસ્તોત્રમ્

શ્રીમહાગણાધિપતયે નમઃ ।
શ્રીગુરુભ્યો નમઃ ।
પુરા સ્કન્દો મહાબાહુઃ પ્રાપ્ય કૌમારજાઙ્ગલમ્ ।
કુમારાદ્રિ સમાસાધ્ય જિત્વા તારકમોજસા ॥ ૧॥

વાસુકિં ભુજગેન્દ્રં ચ કૃત્વા પૂર્ણમનોરથમ્ ।
સ્વાંશં તસ્મિન્ પ્રતિષ્ઠાપ્ય ધારાતીરે મનોરમે ॥ ૨॥

દેવભૂદેવ સઙ્ઘૈશ્ચ દેવાનીકયુતો વશી ।
સુરેન્દ્રયાજ્ઞાયા તસ્ય કન્યાં સ્વીકૃત્ય તત્રહિ ॥ ૩॥

સ્વામિકાર્તિકમાસાદ્ય તાં વિવાહ મહોત્સવૈઃ ।
તત્રસ્થિતં મોદમાનમાનસં મણિમન્દિરે ॥ ૪॥

દેવસેના પતિસ્વાઙ્ગહર્ષં ચાપિ સુધાકરમ્ ।
સ્વચ્છસ્ફટિક નિરમાણદિવ્યસિંહાસનેસ્થિતમ્ ॥ ૫॥

સર્વક્ષેત્રોત્તમે નિત્યં ભોગમોક્ષફલપ્રદે ।
મહાસારસ્વતેપીઠે સ્વગણે સ્વામિ કાર્તિકે ॥ ૬॥

દૃષ્ટ્વાતુપરમાનન્દયુતાઃ સેન્દ્રાયુતાઃ સુરાઃ ।
કૃતાઞ્જલિ પુટાઃ સર્વેતુષ્ટુવુર્મુદિતાસ્તદા ॥ ૭॥

વરોત્પલસ્રક્કરકારવિન્દ સંશોભિહસ્તાં કુચભારનમ્રામ્ ।
બિમ્બાધરાં રક્તનખાં તલોદરીં હરીન્દ્રમધ્યાં ગજમન્દગામિનીમ્ ॥ ૮॥

ભૃઙ્ગાલકાં શ્યામલદેહકાન્તિં મુક્તાવલીભૂષિતકણ્ઠભાગામ્ ।
મહાર્હવસ્ત્રાભરણૈરુ પેતાં વિદ્યુત્પ્રભાં કોમલપાદપદ્મામ્ ॥ ૯॥

રાકાશરશ્ચન્દ્રમુખીં મનોજ્ઞાં મન્દસ્મિતાં કુન્દદતીં સુનાસામ્ ।
તત્ર સ્પુરન્મૌક્તિકચારુકાન્તિં પ્રભાતિરસ્કારકૃતેન્દુ મં(દ) (ડ) લામ્ ॥ ૧૦॥

પ્રિયસમાલિઙ્ગનજાત-સમ્ભ્રમભ્રમદ્વિલાસોત્થિત રોમહર્ષણામ્ ।
સ્રવત્સુધા-સાગરપૂર્ણચન્દ્રકટાક્ષકલ્લોલ વિલાસવિભ્રમામ્ ॥ ૧૧॥

તાં દેવસેનાં પરિરભ્ય ગાઢં લજ્જાનતા મુન્નમયન્ કરાબ્જૈઃ ।
વચોભિરીર્ષ્યા પ્રણયપ્રકોપૈઃ સમ્માનયન્હાસ્યસમન્વિતાભિ ॥ ૧૨॥

કથોરમાર્તાણ્ડ સહસ્ર કાન્તિમત્કીરટભાભાસિદ દિગ્વધૂમુખમ્ ।
સુચ્છરચન્દ્રમરી ચિદિક્કૃત પ્રદીપ્તસૌમ્યનનમણ્ડલં પ્રભુમ્ ॥ ૧૩॥

ચલત્કપોલાન્ત વિરાજિતોજ્જ્વલસ્ફુરત્સુમુક્તામણિવર્યકુણ્ડલમ્ ।
પ્રહર્ષ કૃદ્ભક્તચરોમણ્ડલં સ્મેરાસ્યજૈવાતૃકકૌમુદી કં (મુખં) ॥ ૧૪॥

બિમ્બાધરં સુન્દરકમ્બુકન્ધરં દિવ્યાયુધોદ્યદ્ભુજદણ્ડમ મ્ભતમ્ ।
આજાનુબાહું સુવિશાલવૃક્ષસં પીનોન્નતાંસં વિમલાઙ્ગકાન્તિમ્ ॥ ૧૫॥

ગમ્ભીરનાભિં સુકટિપ્રદેશં સુજાનુ જઙ્ઘં મૃદુપાદ પલ્લવમ્ ।
મહારત્નાઙ્ગદષટ્કિરીટં દ્વિષડ્ભુજં ચિત્રમયૂરવાહનમ્ ॥ ૧૬॥

તેજઃ ક્ષમાબુદ્ધિયશોભિરેવ સમં ધરિત્રી ગુરુશુક્રસૂરૈઃ ।
ગજાખ્યસિંહાનન શૂરપદ્મસતારકાગ્નિપ્રલયામ્બુરાશિમ્ ॥ ૧૭॥

રક્ષો-ગણાદિક્ષિત પારિસંસ્થતદ્વીરમાહેન્દ્રસુદુર્ગભેધનમ્ ।
ગન્ધર્વગીર્વાણ સુસિદ્ધસાધ્ય વિદ્યાધરૈરપ્સરોભીશ્ચ સેવ્યમ્ ॥ ૧૮॥

મુનીન્દ્ર પદ્માસન વારિજાક્ષ ભૂતેશમુખ્યૈર્વર ચારુકન્દમ્ ।
ધારાસરિત્તીરવિરાજમાના કુમારશૈલાગ્ર સુદિવ્યધામ્નિ ॥ ૧૯॥

સ્થિતં સ્વશક્ત્યાપરયા સુરૂપયા તં દેવસેનાસહિતં વરેણ્યમ્ ।
મગ્જાડ્યહન્તારમનન્તશક્તિં ષડાનનં વાઞ્છિતદા નદક્ષમ્ ॥ ૨૦॥

ગૌરીવરાનન્કુરં સુચારુવેષં સુવિદ્યાપ્રદમાશ્રિતાનામ્ ।
નિત્યાન્નદાને સિરુતં મહોગ્રકુષ્ઠાદિહન્તારમનાદિનિર્ગુણ ॥ ૨૧॥

દેવાઙ્ગનાભિર્મુનિકન્યકાભિર્નીરાજિતં મઙ્ગલમઙ્ગલાઙ્ગુમ્ ।
બિલાન્તરાલસ્તિતવાસુકીન્દ્રે સ્વાંશેન તિષ્થન્તમુદાર વિક્રમ ॥ ૨૨॥

સર્વેશ્વરં ત્રિપુરસુન્દરમાદિદેવં જન્માતિગં ભવભયાપહરં વરેણ્યમ્ ।
ગઙ્ગાસુતં ગિરિસુતાં મુદામાવહન્તં વન્દામહે મયભીષ્ટદમાશુદ્ધ્યૈ ॥ ૨૩॥

ઇતિ સ્તુતં દેવગણૈરાવાઙ્મનસગોચરમ્ ।
કાલં કલયતાં સ્તુત્યં સ્તુતિરૂપં સ્તુતિપ્રિયમ્ ॥ ૨૪॥

પ્રણમ્ય દણ્ડવદ્ભૂમૌ વેદાન્તસ્તવમુત્તમમ્ ।
પઠેદિદં સ્વાન્તપદ્મે ચિન્તયન્ સ્વન્દ વીશ્વતમ્ ॥ ૨૫॥

ગજાનનં મહાત્માનં સુધાકુમ્ભં વરાઙ્કુશૌ ।
બિભ્રાણ મોદક હસ્તૃર્નમસ્કૃત્યકિરીટનમ્ ॥ ૧॥

શ્રીપતિસ્તુતચારિત્ર શ્રીમત્સુન્દર વિગ્રહ ।
શ્રીષડાનનર્સેશ શ્રીયં વાસયમેકુલે ॥ ૨॥

પુરન્દરાદિસંસેવ્યપાદપદ્મદયાનિધે ।
પુલિન્દકન્યા રમણ પુરુત્રાહ્યસિવિશ્રુતઃ ॥ ૩॥

વીતરાગાશ્ચમુનયો હૃદમ્બુજપુટેસ્થિતમ્ ।
સર્વજ્ઞં સર્વગં સ્કન્દં સદાપશ્યન્તિ સૂરયઃ ॥ ૪॥

યમાશ્રિત્ય ચ ગીર્વાણા યુધિ શત્રૂન્નિહન્તિ ચ ।
આલમ્બન્તિ સ્વપદવીં તિષ્ઠન્તિસ્વાદુ રાતયઃ ॥ ૫॥

દ્વિષડ્ભુજગદાખેટ પાશ ખડ્ગાદિ હેતિભિઃ ।
વિદ્રાવયાશુમેશત્રૂન્ સઙ્ગ્રામેરિપુસઙ્કટે ॥ ૬॥

તાપત્રય મહાવહ્નિ જ્વાલાસન્તાપિતં હિ મામ્ ।
તથા કામાદિ ષડ્વર્ગૈરાપ્યાયસ્વસમેતુતેઃ ॥ ૭॥

અણોરણી યાં સમજમેકં ધાતરમીશ્વરમ્ ।
મયૂરવાહનં દેવં વિપશ્યેમનૃચક્ષસઃ ॥ ૮॥

મન્દસ્મિતમુખામ્ભોજં યુવાનં ક્રૌઞ્ચભેદિનમ્ ।
સમાશ્રયિત્વા વિબુધા ચ મુદપ્રમુદાઽસતે ॥ ૯॥

મહાસામ્રાજ્યપીઠસ્થં રાજરાજનમદ્યુતિમ્ ।
ક્ષિપ્રમાલોકયિષ્યામઃ સુગન્ધિં પુષ્ઠિવર્ધનમ્ ॥ ૧૦॥

કાયેનમનસાવાચ નતિચિન્તનકીર્તનૈઃ ।
સદારા હૃષ્ટમનસશ્ચોપાસ્મૈગાયતાનરઃ ॥ ૧૧॥

નમોહિરણ્યવર્ણાય હિરણ્યસ્યન્દનાયચ ।
નમો હિરણ્યગાત્રાય નમોહિરણ્યબાહવે ॥ ૧૨॥

દણ્ડિતાખિલદૈત્યૌઘઃ ખણ્ડિતાખિલબન્દનઃ ।

વર્ધિતાનુત ભક્તૌઘઃ શન્નઃ કરત્યર્વતે ॥ ૧૩॥

ગિરિજાસુકુમારાય વરાભયઙ્કરાય ચ ।
ભદ્રદાય વરેણ્યાય વિશ્વરૂપાયવૈ નમોનમઃ ॥ ૧૪॥

અપરાધાન્ય નન્તાનિ કૃતાનિ બહુધા મયા ।
મદીય ઇતિ મત્વાતં રક્ષસ્વમાઝ્જદેપદે ॥ ૧૫॥

દારિ દ્યામ્બુધિ મગ્નં માં શમ્મેનસ્વ પાણિના ।
સમુદ્ધૃત્યચ ગાઙ્ગેય કીર્તિમૃદ્ધિં દદાતુમે ॥ ૧૬॥

આન્યત્સર્વં પરિત્યજ્ય પદાજ્જયુગલં તવ ।
સમાશ્રીતોઽસ્મિ ભગવાન્ કક્ષાણોબ્રહ્મણસ્પતે ॥ ૧૭॥

યશ્ચવ્યોસિત્વમેવેશ વિધિમન્ત્રપુરસ્કૃતમ્ ।
નિયતં હિ દ્વિજાત્યગ્રૈરસ્મિન્યજ્ઞેસ્વધ્વરે ॥ ૧૮॥

લોતાપસ્મારકુષ્ઠાહિરાજચોરાદ્યુપદ્રવાન્ ।
કૃતિકાતનયાસ્માકં ભિન્ધિ દ્વેષઃ સહસ્કૃતઃ ॥ ૧૯॥

ત્વત્સેવાનિરતાનાં હિ ભવન્ત્સા ખણ્ડલશ્રિયઃ ।
અતસ્ત્વામેવ મુનયઃ સઞ્જાનાના ઉપાસતે ॥ ૨૦॥

યજ્ઞાનાં ફલદાતા ત્વં યજ્ઞોપકરણાનિ ચ ।
ત્વં હોતા યજમાનશ્ચ ત્વં સોમાસિ સત્કૃતિઃ ॥ ૨૧॥

દેવસેના સમેતસ્ત્વં ક્રિડસે મણિમન્દિરે ।
સ્વગણૈશ્ચ મહાસેનયત્રતત્પરમં પદમ્ ॥ ૨૨॥

ભ્રાજદ્ગણ્ડસ્થલોદ્ધામ કુણ્ડલોજ્જ્વલિ તાનનમ્ ।
બિભ્રતખણ્ડેદુનયમ્પશ્યેમ શરદઃ શતમ્ ॥ ૨૩॥

પ્રાપ્યતારકદૈત્યેન્દ્રોદ્ભવ સાગરતારકમ્ ।
સંસારસાગરં તીર્ત્વા દેવો દેવેભિરાગમત્ ॥ ૨૪॥

સ્તુત્વા મહાન્તં મહતોહ્યણી યાંસમણોરપિ ।
મોદિષ્યામોવયં નિત્યં પ્રજયા ચધને ન ચ ॥ ૨૫॥

બાલક્રીડાં વિકુર્વાણો બાલભાસ્કરદીપ્તિમાન્ ।
બાલેન્દુમન્દહાસેન ચાત્યાયન્ બહુલં તમાઃ ॥ ૨૬॥

ભોગેચ્છૂનાં સદારાણાં યજતાં શ્રદ્ધયા ગુહમ્ ।
ભવન્ત્યસ્યૈવકૃપ યા યાવેન્ત્યઃપૃથિવ્યાં ભોગાઃ ॥ ૨૭॥

જગત્કુટુમ્ભી દેવેશો દીનસંરક્ષણક્ષમઃ ।
પાક સ્રષ્ટાર્થં સંહર્તા યેઃ વિજાનન્તિ યે ચન ॥ ૨૮॥

યેષાં હિ કુલજાતેન સ્કન્દપાદાશ્રિતેન ચ તરન્તિ ।
વરકામ્ભોધિં શશ્વત્પુશ્રેણ પિતરઃ ॥ ૨૯॥

જનાનામુતદેવાનાં સ્મૃતેસ્તવ પદાબ્જયોઃ ।
સમ્પ્રાપ્તૌ ભોગમોક્ષા ચ કિમશ્ચ શ્રૂણિ કિં તપઃ ॥ ૩૦॥

વયમેતેન સતતં ગમિષ્યામઃ કૃતાર્થ તામ્ ।
શ્રદ્ધયા કેવલેનૈવ યો વિશ્વાભિવિપશ્યતિઃ ॥ ૩૧॥

પુરા કૃતાન્યશેષાણિ પાતકાનિ મહાન્તિ ચ ।
વિનાશ્ય પાલયવિભો ગાયેત્વાનમસા ગિરા ॥ ૩૨॥

અનાથં દીનમાપન્નં કૃપાબ્ધે માં વિલોકય ।
અચિન્તયિત્વા સેનાને યન્મના દુષ્કૃતં કૃતમ્ ॥ ૩૩॥

દેવસેનાપતિસ્ત્વં હિ દેવસે નાયતો વશી ।
અતએવ મહાસેનો ભૂરિદાહ્યસિ શ્રુતઃ ॥ ૩૪॥

કાર્તિકેય મહાબાહો કૃત્તિવાસઃપ્રયઙ્કર ।
કૃત્તિવાસો વિભિન્નાનાં હ્યપ્રાપ્યમનસા સહ ॥ ૩૫॥

તાં નમામિ મહાદેવીં કાર્તિકેયશુ ભાઙ્ગુણામ્ ।
શક્તિં ભદ્રાં ભગવતીં સર્વભૂતનિવેશનીમ્ ॥ ૩૬॥

સંહૃત્યવિશ્વં સચરા ચરં ચ કલ્પાવસાને પરયા સ્વશક્ત્યા ।
સઙ્ક્રીડયંસ્તિષ્ઠતિ ગૂઢમૂર્તિરમ્ભસ્યપારે ભુવનસ્ય મધ્યે ॥ ૩૭॥

ત્વત્સન્નિધાનત્રી જગજ્જનિત્રી સૃજત્યવત્યતિ ચ જીવસઙ્ઘાન્ રજસ્તમઃ ।
સત્ત્વગુણૈરજસ્રં ભૂયિષ્ઠાન્તે નમ ઉક્તિં વિધેમ ॥ ૩૮॥

ત્વત્સમસ્ત્રિષુ લોકેષુ નાન્યસ્તિષ્ઠતિ નિશ્ચિતમ્ ।
વર્ણિતું મહિમાનન્તે સપૂર્વેનાપરે જનાઃ ॥ ૩૯॥

ત્વમેવ દેવદેવેશ જગન્નિવાસ કૂટસ્થાત્મા પુરુષઃ પુરાણઃ ।
ત્વમેવ યત્સર્વં ગતં હિ વસ્તુહ્યાગુહાયાં નિહિતોસ્ય જન્તોઃ ॥ ૪૦॥

લાસ્યાસક્તસ્ય ગિરિજારમણસ્યાન્તિકે ચરન્ ।
પ્રદોષે શિવયોઃ પ્રીતિં જનયન્રોચનાદિવઃ ॥ ૪૧॥

તં વન્દે નિષ્કલં શુદ્ધમાદિ કર્તારમીશ્વરમ્ ।
યતશ્ચ યજુષા સાર્ધમૃચઃ સામાનિ જજ્ઞિરે ॥ ૪૨॥

એનમાશ્રિત્ર જિત્વાસન્ સઙ્ગરેયુદ્ધદુર્મદાન્ ।
દિવિતારેતિ મુદિતા ઇન્દ્રજ્યેષ્ઠા મરુદ્ગણાઃ ॥ ૪૩॥

યત્તદ્બ્રહ્મ જગદ્યોનિઃ સર્વવ્યાપી સનાતનઃ ।
સકાણસ્વેચ્છય શમ્ભોરભ્રાદ્વૃષ્ટિરિવાજનિ ॥ ૪૪॥

ત્વમન્તરાત્મા સર્વભૂતેષુ ચૈકસ્તથાનલિપ્તો ખમિવાપ્યચિન્ત્યઃ ।
નિત્યાનિત્યૈશ્ચેતનાચેતનાત્મ હ્યણોરણીયાન્મહતો મહીયાન્ ॥ ૪૫॥

જગત્કર્તે દિનગોપ્ત્રે ભવહં ત્રેઽસુરદ્રુહામ્ ।
કામદાત્રે વિશ્વકર્ત્રે ગોત્રાણાં પતયે નમઃ ॥ ૪૬॥

તસ્મૈકુમારાય કૃપાકરાય લોકૈકધા ત્રેઽખિલધર્મગોપ્ત્રે ।
દ્વિષડ્ભુજાયાસ્તુ નમઃ પરસ્મૈ યસ્માત્પરન્ના પરમસ્તિ કિઞ્ચિત્ ॥ ૪૭॥

તિરસ્કૃતાનૈકસહસ્રરશ્મિરત્નાઢ્ય દિવ્યાભરણૈરુપેતમ્ ।
માણિક્યવૈડૂર્યકિરીટજુષ્ટં વિભું ચિદાનન્દમરૂપમદ્ભુતમ્ ॥ ૪૮॥

પુરાસુપર્વાપ્સરસોરગેન્દ્ર ભૂદેવસં ઘૈરનુગીયમાનઃ ।
ત્વમેવ માં ભીષણમૃત્યુવક્ત્રાત્પાહિ પશ્ચાત્તાદુતવા પુરસ્તાત્ ॥ ૪૯॥

પાદપઙ્કજભૃઙ્ગેભ્યો મહદ્ભ્યશ્ચ નમો નમઃ ।
તેભ્યો નમસ્તે ગણેભ્યો ઘોરેભ્યોથ ઘોરેભ્યઃ ॥ ૫૦॥

તિલેષુ તૈલં દધિનીવ સર્પિસ્ત્રોતસ્યાશ્રાગ્નિરરણ્યોર્યથા હિ ।
તિષ્ઠત્યાત્મા સર્વભૂતેષુ ગૂઢો ગર્ભૈઇવ સુધિતોગર્ભિણેષુ ॥ ૫૧॥

ત્વં ભૂમિરાપો જ્વલનં હિ વાયુર્નભોદિશશ્ચાપ્યથ ચન્દ્રસૂર્યૌ ।
મરુદ્ગણાશ્ચૈવ સરીસૃપાશ્ચ હ્યથો દિવ્યઃ સુસુપર્ણો ગુરુત્માન્ ॥ ૫૨॥

ત્વય્યેવ હિ જગજાતં ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ।
ત્વય્યેવ વિલયં યાન્તિયત્કિઞ્ચ જગત્યાં જગત્ ॥ ૫૩॥

યમેવ નિત્યં મુનયો યજન્તિ ગાયન્તિ ગન્ધર્વગણાઃ સુસાધ્યા ।

ગૃણન્તિ ચૈવ શ્રુતયોયમાદ્યમાદિત્યવર્ણં તમસઃ પરસ્તાત્ ॥ ૫૪॥

યદક્ષરં પરમં વેદવેદ્યં સર્વસ્ય બીજં જગતાં નિધાનમ્ ।
સચ્ચાસચ્ચવ્યાપકં ચિત્સ્વરૂપમેકં સદ્વિપ્રા બહુધા વદન્તિ ॥ ૫૫॥

કલિકલ્મષહન્તારં દુરિતધ્વાન્તભાસ્કરમ્ ।
એનં હિત્વા ષડાત્માનં તેંઽધન્તમઃ પ્રવિશન્તિ ॥ ૫૬॥

કૃપાલુસ્ત્વાદૃશોનાસ્તિ માદૃશો નાસ્તિ પાપભાક્ ।
પતન્તન્નિરયામ્ભોદૌ રક્ષા રાજન્નઘાયતઃ ॥ ૫૭॥

શ્રિયં સુવિદ્યાં સુકલત્રમુર્વીં પ્રજાઃ પશૂન્ ભૂરિયશોર્થસિદ્ધિમ્ ।
પ્રાપ્તું યદીચ્છા તવ ભક્તિરેવ હ્યયં પન્થાઽનુવિત્તઃ પુરાણઃ ॥ ૫૮॥

સ્તુતિભિર્નતિ ભિર્વિચિન્તનૈઃ તવસન્દર્શનકીર્તનૈલલ્પૈઃ ।
સુધિયોઽપિ ભજન્તિ કેવલં દીર્ઘાયુત્વાય શતશારદાય ॥ ૫૯॥

આનન્દરત્નાકર શિતદીધિતિં ગોણૌઘસદ્રત્ન કરણ્ડમધ્યગમ્ ।
મુક્તાફલં તચ્છર જન નિર્મલં તસ્ય ધીરાઃ પરિજાનન્તિ યોનિમ્ ॥ ૬૦॥

અસાધ્યમપ્યસ્ય કૃપાકટાક્ષાત્સાધ્યં હિ લોકે પ્રવદન્તિ સન્તઃ ।
પુરૈનમાશ્રિત્ય હિ દેવદેવેસ્ત્વષ્ટુર્ગ્રહેઽભિબત્સોમમિન્દ્રઃ ॥ ૬૧॥

મધ્યેબહિર્વાપ્યથ ચાન્તરાલે દિક્ષ્વન્તરિક્ષે બિલમન્દિરે ચ ।
ભૂમૌ તથા કરતલે વિદિક્ષુ નહીન્વસ્યપ્રતિમાનમસ્તિ ॥ ૬૨॥

યદ્બ્રહ્મ યચ્ચાક્ષરમદ્વિતીયમનૌપમં વાઙ્મનસોવિદૂરં
યદેતદવ્યક્તમતીન્દ્રિયં તત્પરમં પદમવભાતિ ભૂરિ ॥ ૬૩॥

યસ્યચિત્તં ત્વત્પદાબ્જે સતતં નિશ્ચલં વિભો ।
નાપ્રાપ્યમસ્તિ સુધિયસ્તસ્ય દેવાઽસન્વશે ॥ ૬૪॥

નૌમિ સદાર્થધાતરં ગોપ્તારં ત્રિદિવૌકસામ્ ।
હન્તારં સર્વશત્રૂણાં જેતારમપરાજિતમ્ ॥ ૬૫॥

યદ્વિદિત્વાપરં ચાન્યત્ જ્ઞાતવ્યં નહિ કિઞ્ચન ।
ઇતિ શુશ્રુમધીરાણાં યેનસ્ત્વદ્વિચચક્ષિરે ॥ ૬૬॥

ત્વમેવ વેદ્યોઽસિ સમાધિનિષ્ઠૈઃત્વમેવ ચેજ્યોઽપિ તથાધ્વરેષુ ।
ત્વમેવપૂજ્યોઽસિ સમસ્ત નીર્જરૈસ્ત્વમ્બ્રહ્મારથિવિદ્બ્રહ્મણસ્પતે ॥ ૬૭॥

અગ્નિર્યથૈકોભુવનં પ્રવિષ્ટો રૂપં રૂપં પ્રતિ રૂપો બહિશ્ચ ॥ ૬૮॥

સૂર્યો યથા સર્વભૂતેષુ ચક્ષુર્નલિપ્યતે ચાક્ષુષૈર્બાહ્ય દોષૈઃ ।
એકસ્તથા સર્વભૂતાન્તરાત્મમલિપ્ય તે ચાક્ષુષૈર્બાહ્યદોષૈઃ ॥ ૬૯॥

એકોવશિ સર્વભૂતાન્તરાત્મ ચૈ કં રૂપં બહુધા યઃ કરોતી ।
તમાત્મસ્થંયેનુ પશ્યન્તિ ધીરાસ્તેષાં શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥ ૭૦॥

સુકામ દોગ્ધ્રીહ્યમૃતપ્રવર્ષણી ભવત્કૃપાયાશ્રિત કામરૂપિણી ।
અસ્માસુ નિત્યં સકલાર્થદાયિની સા વર્ધતાં મહતે સૌભગાય ॥ ૭૧॥

સ એવમાગયણસન્નિકૃષ્ટઃ શરીરૂવસ્થાય કરોતિ સર્વમ્ ।
સ સર્વ ભૂતેન્દ્રિય સંહતિસ્થઃ સસર્વજ્ઞઃ સર્વમિદં પ્રપશ્યતિ ॥ ૭૨॥

ત્વદાશ્રયા મહામયા સૈવ વિશ્વં મિનિર્મમે ।
તતોન્યત્પરમાણુર્વા નેહ ત્વાનાસ્તિ કિઞ્ચન ॥ ૭૩॥

ત્વમન્તરાત્મ પઞ્ચમિશાત્પરશ્ચ ત્વામુત્તમઃ પુરુષ પરમાત્મા ।
હ્યભિન્નઃ સનાતનઃ પ્રેર્યમાણ એકો દેવઃ સર્વભૂતેષુ ગૂઢઃ ॥ ૭૪॥

યદાદિત્યે યચ્છશાઙ્કે યદગ્નૌયદ્વ્યોમ્નિ ભૂમૌયચ્છવસનેયદપ્સુ ।
યદ્યજમાને નિષ્ઠિતં સર્વગુ યત્ ય ઇત્તદ્વિદુસ્ત ઇમે સમાસતે ॥ ૭૫॥

સ્વેચ્છયા ક્રીડમાનસ્સન્વ્યાપ્યાતિષ્ઠતિ સર્વગુ ।
સાક્ષીપ્રકૃત્યા સંયુક્તો ભર્ગો દેવસ્ય ધીમહિ ॥ ૭૬॥

સ્તોતું સ એવ સર્વાત્માદષ્ટું જ્ઞાતું તદર્ચનમ્ ।
કર્તું સજ્જનસંસર્ગં ધિયોયોનઃ પ્રચોદયાત્ ॥ ૭૭॥

ઋઙ્મણ્ડલં યદ્યજૂગંષિ પ્રતીકં સામાન્યુસ્રાભ્રાન્તિતમોનિહન્તામ્ ।
વિભ્રાડ્બૃહત્તત્પરમાર્થરૂપમાદિત્યવર્ણં તમસઃ પરસ્તાત્ ॥ ૭૮॥

સુતેજસ્ર કૃષ્ણશુક્લાદ્યનેક ભેદાન્માય જીવ સઙ્ઘાનનેકાન્ ।
ત્વદાધારા તૃત્પ્રતિબિમ્બિતાસતી યદક્ષરં પઞ્ચવિદં સમેતિ ॥ ૭૯॥

યદક્ષરં પઞ્ચામૃતં બ્રહ્મવેદ્યં છન્દોમયાસ્યં પ્રણૌમિ દ્વાદશારમ્ ।
સપ્તચક્રં વિયતિ ભ્રામ્યમાણમેકં સન્તં બહુધા કલ્પયન્તિ ॥ ૮૦॥

સૂતે જનાનામખિલાર્થસિદ્ધિં યા સ્કન્દશક્તિ કૃપયા મનોજ્ઞા ।
અભાતિ સા કલ્પલતેવે શશ્વત્ પ્રિયં સખાયં પરિષસ્વજાના ॥ ૮૧॥

તાં દેવસેનાં તરુણાર્કભાસાં કુન્દેન્દુ મન્દસ્મિતશોભિવક્ત્રામ્ ।
સ્મરામિ નિત્યં કનકાભગાત્રાં વચોવિદં વાચમુદીરયન્તીમ્ ॥ ૮૨॥

પુરા મહત્માભગવાન્ઘટોદ્ભવઃ સ્તોત્રેણ સંસુત્ય ષડાસ્યમાદરાત્ ।
ભૂત્વા મુનીનાં પ્રવરઃ સમાહિતશ્ચિ કિતુષી પ્રથમા યજ્ઞિયાનામ્ ॥ ૮૩॥

વિદ્યાવિત્તં યશસ્વર્ગરોક્ષૌચાયૂષિનઃ સદા ।
વિજયં દેહિ સેનાનેસ્ત વામત્વાસ્વાધ્યઃ ॥ ૮૪॥

ત્વયા સમ્પ્રેર્યમાણોહભક્ત્યા સ્તૌમિ હરાત્મજ ।
પાહિનઃ કૃપયા દેવ સેનાનિભ્યશ્ચ વો નમઃ ॥ ૮૫॥

દુઃસ્વપ્ન દુર્નિમિત્તોત્થભયં શમય શાઙ્કરેત્વમ્ ।
હિ પક્ષિમુખાચ્ચાપિ ભદ્રન્નઃસર્વતો વદ ॥ ૮૬॥

નિહત્ય તારકં સઙ્ખ્યેસપુત્રામાત્યબાન્ધવમ્ ।
કુમારશૈલશૃઙ્ગાગ્રમરોહન્નુત્તરાં દિવમ્ ॥ ૮૭॥

ભવામયનિહન્તાપિ કુષ્ઠરોગાતુરાંસ્તથા ।
રક્ષિષ્યસીતિશ્રુણમો હરિમાણં ચ નાશય ॥ ૮૮॥

યત્રોચ્છિષ્ટાનુલેપેન પાદસઙ્ઘૈર્નલિપ્યતે ।
સુબ્રમણ્યસ્ય મહિમાકસ્તદ્વેદદ્ભુતમ્ ॥ ૮૯॥

સર્વેશમાશ્રિત્ય તથાન્નમુત્તમં જીવન્તિ જીવા ઇતિદાનલીલયા ।
ધાતુઃ ફલં બહ્વિતિદર્શયન્નસાવધારયદ્ધરિતોભોજનમ્ ॥ ૯૦॥

દારાપગોપાન્ત કુમારભૂભૃતિસ્થિત્વાન્નદાનં પ્રકરોતિ સન્તતમ્ ।
આજ્ઞાપિતં તેન ગુહેન ચૈવં કેવલાઘો ભવતિ કેવલાદી ॥ ૯૧॥

વિશોષણાય દૈત્યેન્દ્ર મહાપ્રલયવારિધેઃ ।
નિર્યાહીત્ય બ્રુવન્ દેવા જયતામિવદુન્દુભિઃ ॥ ૯૨॥

આમ્નાય પાદપ્રહિતેન સંસ્તુતઃ સ્તવેનચાનેનહુતાશભૂર્ગુહઃ ।
તુષ્ટ સદા દૈવત દૈવતઃ સ્વયવંસ્મભ્યં તદ્ધત્તનયદ્વયીમહે ॥ ૯૩॥

ઇમં સ્તવમધીયાનઃ સ્કન્દભક્તિયુતોવશી ।
પ્રાપ્યેહ સકલાન્ કામાન્ ઘોરમૃત્યુ ભયં હે ॥ ૯૪॥

સ્વસ્તિ શ્રીસ્કન્દવેદપાદસ્તોત્રમ્ ।

Proofread by Preeti N. Bhandare

*Shri Skanda Vedapada Stotram*
pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*